# सामोदं सम्मिलामः

## आमुखम्

उत्सवाः सांस्कृतिकाभिवृद्धिं द्योतयन्ति। भारते सर्वत्र विभिन्नाः उत्सवाः आघुष्यन्ते। सहवर्तित्वादिगुणानाम् सम्मेलनम् एतेषु उत्सवावसरेषु जायते। तेषु अन्यतमः श्रावणोत्सवः केरलीयानां देशीयोत्सवः। 'सामोदं सम्मिलामः' इत्यस्मिन् पाठे श्रावणोत्सवसम्बन्धिनः कार्यक्रमान्, गीतानि, विविधाः केलीः इत्यादीन् बहून् विषयान् परिचाययति। एतैः साकं भाषानैपुणीविकासाय तृतीयाविभक्तिपरिचायनं, नामपदानां क्रियपदानां च विवेचनम्, शब्दकोशनिर्माणं, कथापूरणं चेति कानिचन प्रवर्तनान्यपि आयोजितानि। तथैव सङ्गणकयन्त्रस्य साहाय्येन कर्तुं योग्यानि प्रवर्तनान्यपि सूचितानि। एतेषां सर्वेषामपि प्रवर्तनानां यथाविधि निर्वहणेन छात्रान् संस्कृततत्परान् करोतु।

**पाठस्य नाम - सामोदं सम्मिलामः।**

**आशयः - ऐक्यस्य समभावनायाः प्राधान्यम्।**

**उद्देश्यम् - उत्सवाः समभावनायाः ऐक्यस्य च अवसरं यच्छन्ति इत्यवबोधः।**

**नैपुणी - वाक्यरचना, विवरणपरिचयः च।**

**अन्तर्जालघटकाः - उत्सवानां चलच्चित्रम्**

**कालांशाः - १८**

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| ऐक्यस्य समभावनायाः च अवसराः भवन्ति उत्सवाः। सामोदं सम्मिलामः। (लघु विवरणम्) | लघुविवरणं पठित्वा आशयं वदति, लिखति च। क्रियापदनामपदभेदं ज्ञात्वा विविच्य लिखति, वर्णानां नामानि पठित्वा लिखति, एकवचन - बहुवचनरूपं ज्ञात्वा पट्टिकां पूरयति, आशंसापत्रस्य घटनां पालयित्वा निर्माति। तृतीयाविभक्तिं प्रत्यभिजानाति। | घटनानुसारं आशंसापत्रं निर्मति। वर्णान् विविच्य पूरयति। उचिततालानुसारं नौकागानम् आलपति। |

अध्यापिका विविधानाम् उत्सवानां चित्राणि सञ्चित्य कक्ष्यायां प्रदर्शयतु। चित्रं दृष्ट्वा तत्र सूचिताः उत्सवाः के के इति कथनाय छात्रान् निर्दिशतु। छात्राणाम् उत्तराणि श्यामफलके लिखतु। उत्सवानधिकृत्य चर्चां चालयतु। अन्ते उत्सवाः सांस्कृतिकोन्नमनाय सहायकाः, परस्परस्नेहसन्तोषदायकाश्च भवन्ति इति क्रोडीकरोतु। तदानीम् अध्यापिका एवं पृच्छति - चित्रेऽस्मिन् केरलीयानां देशीयोत्सवः कः? इति। तदा छात्राः ओणम् इति वदेयुः। तदानीं ओणम् इत्यस्य संस्कृतनाम श्रावणोत्सव इति परिचाययतु, श्यामफलके लिखतु च। अनन्तरं पाठपुस्तकं स्वीकृत्य पाठभागे दत्तानि चित्राणि किं किं सूचयन्ति?

इति कथनाय छात्रान् प्रेरयति। तदा छात्राः श्रावणोत्सवमधिकृत्य वदन्ति। अनन्तरं पाठस्य वाचनाय छात्रान् प्रेरयतु। मध्ये मध्ये उचितान् अवधारणप्रश्नान् पृच्छतु। यथा -

१. आनन्ददायकाः के ?

२. केरलीयानां देशीयोत्सवः कः?

३. पुष्पकोष्ठं कुत्र रचयति?

४. श्रावणोत्सवसम्बन्धिन्यः केलयः काः ?

५. ....................................

**मूल्यनिर्णयसूचिकाः**

उचितम् उत्तरम्।

पूर्णम् उत्तरम्।

उच्चारणस्फुटता।

छात्रान् चतुःसङ्घान् करोतु। पाठान्तर्गतानां चित्राणां निरीक्षणाय तान् नियोजयतु। पुनः एकैकस्य सङ्घस्यैकं चित्रम् इति क्रमेण चित्राणि निरीक्षन्तां छात्राः। ततः परं चित्रेण सूचितो विषयः कुत्र वर्तते इति सङ्घे चर्चां कृत्वा छात्राः वदन्तु। तदर्थम् अधोदत्ताः सूचनाः एकैकासु चिटिकासु लिखित्वा प्रतिसङ्घं ददातु।

सूचिकाः

१ महाबलिः, वामनः ,श्रावणमासः , ऐतिह्यम्

२ हस्तनक्षत्रम् , बहुवर्णपुष्पचित्रम् , अङ्कणम्

३ नूतनवस्त्रम् , सन्तोषः

४ सहभोजनम् , बान्धवाः

तदनु चित्रेण सूचितं विषयं सङ्घेष्वेकः अवतारयतु। अध्यापिकायाः प्रश्नानुसारेणापि प्रवर्तनमवतारयितुं शक्यते।

अन्ते अध्यापिका सर्वं क्रोडीकृत्य वाचयति।

अध्यापिका यथोचितं मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसूचिकाः।**

उचितम् उत्तरम्।

उच्चारणस्फुटता।

**प्रवर्तनम् १ - पदच्छेदलेखनम्।**

छात्रान् सङ्घान् कृत्वा पदच्छेदकरणाय उदाहरणं प्रदर्शयतु,

यथा - इत्यारम्भः = इति + आरम्भः

ततः विश्लेषणाय पदानि ददातु - इत्यादयः, इत्यादिभिः, इत्यादीनि, इत्यारभ्य चेति।

कृतं प्रवर्तनम् छात्रसङ्घाः अवतारयन्तु। अध्यापिका स्खालित्यानि परिहृत्य उचितं रूपं श्यामफलके लिखित्वा प्रदर्शयतु। टिप्पणीपुस्तके लेखनाय निर्दिशतु।

**मूल्यनिर्णयसूचिकाः।**

अक्षरज्ञानम्।

पदज्ञानम्।

उचितप्रयोगः।

यथा -

| | | |
|---|---|---|
| इत्यादयः | - | इति + आदयः। |
| इत्यादिभिः | - | इति + आदिभिः। |
| इत्यादीनि | - | इति + आदीनि। |
| इत्यारभ्य | - | इति + आरभ्य। |

**प्रवर्तनम् २ तृतीयाविभक्तिरूपाणां चयनम्।**

**उद्देश्यम् - विभक्तिपरिचयः।**

**प्रक्रिया**

अध्यापिका कानिचन वस्तूनि आदाय कक्ष्यां प्रविश्य तानि अकारान्तपुंलिङ्ग-आकारान्तस्त्रीलिङ्ग-अकारान्तनपुंसकलिङ्गक्रमेण उत्पीठिकायां क्रमशः स्थापयति।

यथा-

| प्रथमगणः | द्वितीयगणः | तृतीयगणः |
|---|---|---|
| सुधाखण्डः | मापिका | उपनेत्रम् |
| दण्डः | तूलिका | जलम् |
| चषकः | स्थालिका | कङ्कणम् |
| | | वस्त्रम् |

अनेनैव क्रमेण श्यामफलके लिखति। प्रत्येकमपि वस्तुनः नाम पृच्छति। छात्राः नामानि वदन्ति। अनन्तरं छात्रमेकम् आहूय सुधाखण्डं दत्वा श्यामफलके किमपि लेखनाय निर्दिशति। तदा अध्यापिका वदति, अजयः सुधाखण्डेन लिखति इति। ततः पृच्छति, अजयः केन लिखति? इति। तदा छात्राः अजयः सुधाखण्डेन लिखति इति उत्तरं ददति। अनन्तरम् अपरमेकम् आहूय पूर्ववत् प्रत्येकं पदस्य तृतीयाविभक्तिरूपाणि प्रश्नोत्तररीत्या परिचाययति। अनन्तरं श्यामफलके एकैकस्यापि पदस्य तृतीयैकवचनरूपं लिखति। लिखितस्य वाचनाय छात्रान् निर्दिशति। टिप्पणिपुस्तके लेखनाय अवसरं ददाति।

| | | | |
|---|---|---|---|
| सुधाखण्डः | - सुधाखण्डेन | जलं | - जलेन |
| दण्डः | - दण्डेन | वस्त्रं | - वस्त्रेण |
| चषकः | - चषकेन | उपनेत्रं | - उपनेत्रेण |
| मापिका | - मापिकया | कङ्कणम् | - कङ्कणेन |
| तूलिका | - तूलिकया | | |
| स्थालिका | - स्थालिकया | | |

**मूल्यनिर्णयसूचिकाः।**

तृतीयाविभक्तिरूपाणां चयनम्।

स्पष्टोच्चारणम्।

**प्रवर्तनम् ३ पट्टिकाकरणम्।**

**उद्देश्यम् - वर्तमानकालक्रियापदानां वचनज्ञानम्।**

**प्रक्रिया**

अध्यापिका कक्ष्यां प्रविश्य पाठभागस्य वाचनाय कमपि छात्रं निर्दिशति। छात्रस्य वाचनावसरे अध्यापिका सूचयति - बालः पठति इति। छात्रान् पृच्छति कः पठति इति। छात्राः वदन्ति बालः पठति इति। एवं क्रियापदानां नामपदानां च एकवचनरूपं परिचाय्य छात्रद्वयं छात्रचतुष्टयं ततोप्यधिकं वा आहूय द्विवचनरूपं बहुवचनरूपं च परिचाययति। यथोचितं क्रियापदानां परिवर्तनमपि करणीयम्।

यथा - लिखति, गायति, गच्छति, आगच्छति, अस्ति , हसति, चलति, उत्तिष्ठति, उपविशति

अनन्तरं छात्रान् सङ्घान् कृत्वा पाठभागस्थपट्टिकापूरणाय निर्दिशति। छात्राः सङ्घे स्थित्वा प्रपूर्य अवतारयन्ति। संशोधयतु अध्यापिका। उचितं रूपं श्यामफलके लिखतु । छात्राः टिप्पणीपुस्तके लिखन्तु ।

**मूल्यनिर्णयसूचिकाः**

अक्षरविन्यासः।

वचनानुसारित्वं।

उचितं लेखनम्।

यथा -

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| भवति | गायतः | सन्ति |
| लिखति | | अघोषयन्ति |
| गायति | | रचयन्ति |
| आचरति | | धरन्ति |
| पठति | | |

**प्रवर्तनम् ४ विविच्य लेखनम्।**

**उद्देश्यम् - नामपदानां क्रियापदानां विवेचनम्।**

**प्रक्रिया**

पाठभागं पठित्वा पाठपुस्तके दत्तानां क्रियापदानां नामपदानां च पट्टिकापूरणाय छात्रान् निर्दिशतु। प्रवर्तनमिदं वैयक्तिकम् भवतु। पूरितां पट्टिकां मूल्यानिर्णयाय छात्राः परस्परं विनिमाय ददतु।

अध्यापकः मूल्यनिर्णयसूचकान् श्यामफलके लिखित्वा प्रदर्शयतु । समुचितमुत्तरमपि प्रदर्शयतु। तदाधारीकृत्य मूल्यनिर्णयं कुर्वन्तु छात्राः।

**मूल्यनिर्णयसूचिकाः।**

उचितं पूरणम्।

अक्षरव्यक्तता।

यथा -

| क्रियापदानि | नामपदानि |
|---|---|
| गायन्ति | जनाः |
| भवति | उत्सवाः |
| रचयन्ति | दीपावलिः |
| धरन्ति | प्रकृतिः |

**प्रवर्तनम् ५- शब्दकोशरचना।**

**उद्देश्यम् - अक्षरमालानुसारं पदानां क्रमीकरणम् ।**

अध्यापिका पाठभागे दत्तम् अक्षरमालादिकं परिचाय्य पाठभागे दत्तानि पदानि अक्षरमालाक्रमेण विलिख्य शब्दकोशनिर्माणाय निर्दिशति। तदर्थं अध्यापिकया सङ्घीकृताः छात्राः चर्चां कुर्वन्तु। आवश्यकं साहाय्यञ्च ददातु। ततः सङ्घेष्वेकः चर्चितानंशान् अवतारयतु । तदानीम् अध्यापिका पूर्वं सज्जीकृतं शब्दकोशं प्रदर्शयतु। तस्य साहाय्येन स्वयं मूल्यनिर्णयाय छात्राः यतन्ताम्।

**शब्दकोशः**

**उदा -**

अद्य - अस्मिन् दिने

| | | | |
|---|---|---|---|
| इन्दुः | उत्सवाः | ऐतिह्यम् | एकम् |
| काकः | गीतम् | जनाः | दीपावलिः |
| नूतनम् | पर्णम् | भ्रमरः | मनोहरम् |
| यानम् | लता | वानरः | शुकःसर्वे |

पदानाम् अर्थान् छात्राः प्रादेशिकभाषया लिखन्तु।

**मूल्यनिर्णयसूचिकाः।**

अक्षरमालानुसारेण पदक्रमीकरणम्।

अर्थग्रहणम्।

**प्रवर्तनम् ६ कोष्ठकात् उचितवर्णं चित्वा लेखनम्।**

**उद्देश्यम् - वर्णपरिचयः।**

**प्रक्रिया**

अध्यापिका वर्णपरिचायनाय विविधवर्णेषु (नील-पीत-कपिश-हरित-रक्त-श्वेत-श्याम) लभ्यमानानि वस्तून्यानेतुं छात्रान् पूर्वमेव सूचयतु। छात्रैरानीतानि वस्तूनि कक्ष्यायां प्रदर्श्य एकैकस्यापि वस्तुनः नाम वर्णं च पृच्छतु। यदा छात्रः वर्णनाम प्रादेशिकभाषायां वदति तदा तन्नाम संस्कृतभाषाया उक्त्वा श्यामफलके लिखतु। एवं सर्वेषां वर्णानां मातृभाषानामानि संस्कृतनामानि च लिखतु। टिप्पणीपुस्तके अनुलिखन्तु छात्राः । तदनु पाठभागे विद्यमानं प्रवर्तनं वैयक्तिकतया कुर्वन्तु छात्राः। तदेवं कर्तुं शक्यते।

अध्यापिका एकैकस्य वस्तुनः नाम उक्त्वा तस्य वर्णः कः इति पृच्छतु। यथा - एषः कः? तदा छात्राः कदाचित् उत्तरं वदेयुः। नास्ति चेत् अध्यापिकया तत् वक्तव्यम्। एषः सुधाखण्डः। कः वर्णः ? श्वेतवर्णः इति छात्रः वदेत्। नो चेत्, अन्यस्मै अवसरः देयः। आवश्यकं साहाय्यम् अध्यापकेन देयम्। एवमेव अन्येषामपि वस्तूनां वर्णान् पृष्ट्वा वर्णानां नामबोधनं करणीयम्। कृष्णफलकम् - श्यामवर्णः , पाटलम्- रक्तवर्णः, फलम् - पीतवर्णः , पर्णं - हरितवर्णः , धेनुः - कपिशवर्णः , युतकम् - नीलवर्णः । उत्तरबोधनानन्तरं चित्राणाम् अधः वर्णनामलेखनार्थं छात्रान् प्रेरयतु।

अध्यापिकायाः साहाय्येन मूल्यनिर्णयमपि कुर्वन्तु।

**मूल्यनिर्णयसूचिकाः।**

समीचिनं पदम्।

अक्षरशुद्धिः।

**प्रवर्तनम् - ७ आशंसापत्रनिर्माणम्।**

**उद्देश्यम् - आशंसापत्रलेखनपरिचयः।**

**प्रक्रिया**

विविधानि आशंसापत्राणि सञ्चित्य आनेतुं पूर्वमेव छात्रान् सूचयतु। छात्रैः आनीतानि आशंसापत्राणि कक्ष्यायां प्रदर्शयन्तु। ततः उत्सवानां नामानुसारं छात्रान् सङ्घान् करोति। कानिचन आशंसावाचकानि दत्वा आशंसापत्ररचनार्थं निर्दिशतु। सङ्घाङ्गैः रचितं आशंसापत्रम् अवतारयतु । ततः पाठभागस्थां मातृकां, वाक्यानि च उपयुज्य द्वित्राणां आशंसापत्राणां रचनायै छात्रान् निर्दिशतु। लिखितानि अवतारयन्तु छात्राः। अध्यापिका संशोधयतु। ततः छात्राः टिप्पणीपुस्तके लिखन्तु।

**मूल्यनिर्णयसूचिकाः।**

उचितरूपम्।

वाक्यपूर्णता।

सर्गात्मकता।

**प्रवर्तनम् ८ कथापरूणम्।**

**उद्देश्यम् - कथापूरणसामर्थ्यम्।**

**प्रक्रिया**

पाठभागं पठित्वा श्रावणोत्सवमधिकृत्य ऐतिह्यकथायाः पूरणाय छात्रसङ्घान् निर्दिशति। छात्राः सङ्घे स्थित्वा कथां कथयन्तु, लिखन्तु, वर्गे अवतारयन्तु च। अध्यापकः यथोचितं मूल्यनिर्णयमपि करोति।

**मूल्यनिर्णयसूचिकाः।**

आशयपूर्णता।

उचितं पूरणम्।

भागभागित्वम्।

उदा- पुरा महावलिः नाम असुरचक्रवर्ती केरलान् अपालयत् । तस्य शासनकालजनाः सर्वे अपि सन्तुष्टाः अभवन्। वामनरूपः महाविष्णुः महाबलिम् उपगम्य त्रिपादमितां भूमिं अयाचत। महाबलेः प्रार्थनामनुसृत्य वामनः पादद्वयेन भूमिं स्वर्गञ्च माति स्म। तृतीयपादविन्यासेन वामनः महाबलिं सुतलम् अनयत् ।

**प्रवर्तनम् ९ - उचितरूपमुपयुज्य पूरणम्**

**उद्देश्यम्  - उपपदस्य सह इति अव्ययस्य प्रयोगपरिचयः।**

**प्रक्रिया**

अध्यापकः छात्रान् पृच्छति। यूयं पश्यथ- तत्र क्रीडाङ्कणे छात्राः क्रीडन्ति। ततः अध्यापकः विशदीकरोति यथा - 'बालः मित्रेण सह क्रीडति इति। ततः प्रश्नं  पृच्छति - 'बालः केन सह क्रीडति?' इति। बालः मित्रेण सह क्रीडति इति छात्राः वदन्ति। अनन्तरं छात्रः अध्यापकेन सह आगच्छति, बालिका बालकेन सह पठति इत्येवम् अध्यापकः प्रतिपादयति। प्रश्नान् अपि पृच्छति। ततः पाठभागे दत्तानां वाक्यानां कोष्ठकस्थानां पदानाम् च उचितं रूपम् उपयुज्य पूरणाय निर्दिशति। छात्राः वाक्यानि अवतारयन्ति। अध्यापकः संशोधयति, टिप्पणिपुस्तके लेखनाय निर्दिशति। यथोचितं मूल्यनिर्णयञ्च करोति।

**मूल्यनिर्णयसूचिकाः।**

तृतीयाविभक्तिज्ञानम्।

अक्षरव्यक्तता।

पूर्णवाक्यलेखनम्।

उदा -   लता <u>राजेशेन</u> सह विद्यालयं गच्छति।

सुरेशः <u>विनोदेन</u> सह क्रीडति।

**प्रवर्तनम् : १० नौकागानालपनम्।**

**उद्देश्यम् - संस्कृतभाषायां नौकागानालपनतात्पर्यम्।**

**प्रक्रिया**

अध्यापकः श्रावणोत्सवसम्बन्धिन्यः केलयः काः? इति छात्रान् पृच्छति। छात्रैरुक्तानां केलीनां नामानि श्यामफलके लिखित्वा एवं क्रोडीकरोति- आर्द्राकेलिः, शार्दूलकेलिः, नौकाकेलिः, पुष्पकोष्ठरचना, दोलान्दोलनम् इति।

ततः पाठभागे दत्तस्य नौकागानस्य परिचायनं कृत्वा सतालं सस्वरं च गानमालपति छात्रान् आलापयति। मूल्यनिर्णयः करणीयः।

**मूल्यनिर्णयसूचिकाः**

तालबद्धता।

आलापनैक्यम्।

अनुस्यूतता।

## अनुबन्धः

### श्रावणगीतम्

मावलिशासनकाले देशे
मानवाः सर्वे समाना एव।
आवसन् सामोदमेव सर्वे
आपदो नासन् कदापि केषाम्।।
चौर्यमपिनासीद् वञ्चनापि
तिलमात्रं नासीत् तदानृतं च।
नासन् तत्रासत्यमापकानिअन्यान्यलीकानि तत्र नासन्।।
दुःखानि नासन् च रोगाः नासन्
बालमरणानि श्रोतं नैव।
दुष्टान् तदा द्रष्टुं नैव साध्यं
सज्जनाः केवलानासन् भूमौ।।

### ഓണപ്പാട്ട്

മാവേലിനാടുവാണീടും കാലം
മാനുഷരെല്ലാരുമൊന്നുപോലെ
ആമോദത്തോടെവസിക്കും കാലം
ആപത്തങ്ങാർക്കുമൊട്ടില്ലതാനും
　　കള്ളവുമില്ല ചതിയുമില്ല
　　എള്ളോളമില്ലാ പൊളിവചനം
　　കള്ളപ്പറയും ചെറുനാഴിയും
　　കള്ളത്തരങ്ങൾ മറ്റൊന്നുമില്ല
ആധിയും വ്യാധിയുമൊന്നുമില്ല
ബാലമരണങ്ങൾ കേൾപ്പാനില്ല
ദുഷ്ടരെ കൺകൊണ്ടുകാൺമാനില്ല
നല്ലവരല്ലാതെയില്ലപാരിൽ

**व्याकरणकार्याणि।**

हस्तनक्षत्रादारभ्य = हस्तनक्षत्रात् + आरभ्य । झलां जशोऽन्ते इति सूत्रेण पदान्तस्य झलः जश्त्वम्।

बन्धुजनैः सह - सहयुक्तेऽप्रधाने इति सूत्रेण सहार्थकाव्ययानां योगे अप्रधाने कर्तरि तृतीयाविभक्तिः भवति।

यथा - पुत्रेण सह पिता आगच्छति।

मित्रेण साकं राजू गायति।

सोदर्या सार्धं राधा नृत्यति।

मात्रा समं पिता चित्रं पश्यति।

***मासानां नामानि आरम्भक्रमेण।***

| क्रिस्तुवर्षः | शकवर्षः | कोलम्बाब्दः - संस्कृते | हिज्रावर्षः |
|---|---|---|---|
| जनुवरि | चैत्रम् | चिङ्ङम् - सिंहः | मुहरम् |
| फेब्रुवरि | वैशाखम् | कन्नि - कन्या | सफर् |
| मार्च् | ज्येष्ठम् | तुलाम् - तुला | रा अव्वल् |
| एप्रिल् | आषाढम् | वृश्चिकम् - वृश्चिकः | रा आखर् |
| मेय् | श्रावणम् | धनु - धनुः | जा अव्वल् |
| जून् | भाद्रपदम् | मकरम् - मकरः | जा आखर् |
| जूलै | आश्विनम् | कुम्भम् - कुम्भः | रजब् |
| आगस्ट् | कार्तिकम् | मीनम् - मीनः | श अव्वान् |
| सेप्टम्बर् | मार्गशीर्षम् | मेटम् - मेषः | रमसान् |
| ओक्टोबर् | पौषम् | इटवम् - ऋषभः | शव्वाल् |
| नवम्बर् | माघम् | मिथुनम् - मिथुनम् | दुलख अद् |
| डिसम्बर् | फाल्गुनम् | कर्किटकम् - कर्किटकम् | दुल् हज्ज् |